# Navanatha Stotram

# नवनाथस्तोत्रम्

## Document Information

Text title : Navanathastotram

File name : navanAthastotram.itx

Category : deities_misc, gurudev, stotra

Location : doc_deities_misc

Transliterated by : Aaditya Kalyanaraman aadityakalyaan at gmail.com

Proofread by : Aaditya Kalyanaraman aadityakalyaan at gmail.com

Latest update : August 28, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 28, 2021

*sanskritdocuments.org*

# नवनाथस्तोत्रम्

ॐ नमो नवनाथेभ्यः ।
अथ नवनाथस्तोत्रम् ।
आदेशवस्तुविषयः सुरसिद्धलक्ष्यो यश्चैकनाथ इह सन्नवमूर्ति-पूर्तिः ।
सर्वोपरि प्रतिपलं वरिवर्ति कुर्वे कायेन तस्य मनसा वचसा प्रणामम् ॥ १॥

मोहान्धकारविचलन्मनसो मनुष्यां, स्वत्त्वोज्झितानपि परम्परयोपदेष्टुम् ।
तत्त्वं विमुक्तय उताकृत योगशास्त्रमादेश एतु मम तत्र य आदिनाथः ॥ २॥

यो ह्यादिनाथ उत राघवमत्स्यजन्मा मत्स्येन्द्रनाथ इति योगकभोगवृत्तिः ।
विस्मापयन्नखिलसिद्धसुरांश्च जात आदेश एतु मम तत्र पवित्र मूर्तौ ॥ ३॥

यो ह्यादिनाथ उत भोगभरं विहाय योगं सतत्त्वमुदय क्रमतो निनाय ।
नाम्ना श्रुतोऽस्त्युदयनाथ इति श्रितश्रीरादेश एतु मम तत्र पवित्रमूर्तौ ॥ ४॥

यश्चाप्यनेकभवभूतगणान् कृपातः पात्वातिपीडितहृदः किल कालदण्डात् ।
तद्दुर्लभामरपदः स सुखं निनाय यद्दण्डनाथ इति सिद्धगणप्रसिद्धः ई ॥ ५॥

आत्मानमेव सकलेभ्य उपादिदेशा, त्मन्येव नित्यरमणं किल यस्य यस्मात् ।
सत्यप्रवाहक इतो नहि सत्यमन्यत् सत्य स्वरूप इह यत् किल सत्यनाथः ॥ ६॥

सत्यस्वरूपकतया सततं ह्यसङ्ग एकान्तिकोऽपि सततं स्वमुखे पराख्ये ।
सन्तोषमादधदयं प्रससाद यस्मात् सन्तोषनाथ इति गीयत इडयनामा ॥ ७॥

कूर्माभिधानमुपलक्षणमादधानो भूमीमधोभुवनमप्यबतीह यस्मात् ।
यः कूर्मनाथ इति शर्मकरो जनाना-मादेश एतु मम तत्र पवित्रमूर्तौ ॥ ८॥

पुण्यात्मनां विजयतां (त्रिजगतां) किल भुक्ति-मुक्ति-दाने पुनः परमतत्त्वनिदेशनाय
।
प्रावर्ततानुगुणयोगमयानुभूति-येनोत्तमा स च जलन्धरनाथनामा ॥ ९॥

सर्वे क्षयेण रहिता विहिताश्च येन ये चेतना हि गुणरूपविलक्षणत्वात् ।

गोरक्षनाथ इति यः कथितो हि यस्मा-द्वादेश एतु मम तत्र पवित्रमूर्तो ॥ १०॥

नवनाथनुतिं सततं रुचिरां, पठतीह जनः परमादरतः ।
परितोषमुपेत्य स नाथ इतः प्रददाति मनोरथमात्मसुखम् ॥ ११॥

॥ इति श्रीनवनाथस्तोत्रं सम्पूर्णम् ॥

Encoded and proofread by Aaditya Kalyanaraman aadityakalyaan at gmail.com

*Navanatha Stotram*

pdf was typeset on August 28, 2021

Please send corrections to *sanskrit@cheerful.com*